# तात्पर्यलिङ्गानि

प्रबन्धकर्ता- विमलरक्षितः

इह खलु जगति लौकिकाः परीक्षकाश्च बुभुत्सितं श्रोतृपुरुषानवगतमर्थं बोधयितुं शब्दमुच्चारयन्ति, प्रष्टारश्च शब्देनैव स्वकीयं प्रष्टव्यं पृच्छन्ति। एवं शब्द एव प्राधान्येन लोकयात्रां निर्वहति। तथाहि उच्यते काव्यादर्शे दण्डिना-

इदमन्धः तमः कृत्स्नं जायेत भुवनत्रयम्।

यदिशब्दाह्वं ज्योतिरासंसारं न दीप्यते।। इति।

एवञ्च येन शब्देन बुभुत्सितः अर्थः विज्ञातो भवति स भवति वाक्यम्, वाक्येनैव निराकांक्षबोधोदयात्। तस्मात् वाक्याख्यशब्दात् जायमानो बोध एव शाब्दबोधो वाक्यार्थबोधः संसर्गबोधो वेति उच्यते प्राज्ञैः। तच्च वाक्यं प्रमाणमप्रमाणञ्चेति द्विविधं भवति । तत्र प्रमाणवाक्यात् जायमानः वाक्यार्थ एव शाब्दबोधविषयो भवति। तादृशप्रमाणवाक्यमपि लौकिकं वैदिकञ्चेति द्विविधं भवति। तत्र तादृशवैदिकवाक्यार्थविचाराय एव मीमांसाशास्त्रस्य प्रवृत्तिः। तादृशवाक्यार्थविचाराय महर्षिजैमिनिना द्वादशलक्षणी विरचिता। महर्षिजैमिनिना ‘अर्थैकत्वादेकं वाक्यं साकांक्षञ्चेद्विभागे स्यात् ’ (2.1.46) इति सूत्रेण आकांक्षायोग्यतासत्तितात्पर्यवदेकमुख्यविशेष्यकपदकदम्बकं वाक्यत्वेन प्रतिपादितम्। उक्तञ्च, भट्टपादैः तन्त्रवार्तिके –

तस्मात्पदेषु यावत्सु श्रूयमाणेषु दृश्यते।

विस्पष्टमैक्यमर्थस्य तावतादेकवाक्यता।। (2.1.46) इति।

तथा च साकांक्षयोग्यासन्नसतात्पर्यैकार्थपदसमूहो वाक्यमिति फलति। तच्च वाक्यं तदैव प्रमाणं भवति यदि तत् अज्ञातावाधितार्थविषयकप्रतीतिजनकं भवति। अत एव उक्तं शब्दलक्षणं शबरस्वामिना 'शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानमिति।' इति। तथा च, यः शब्दः स्वविषयकज्ञानेन मानान्तराप्राप्तवाधितार्थज्ञानं जनयति स प्रमाणमित्युक्तं भवति। उक्तञ्च, वेदान्तपरिभाषायां धर्मराजाध्वरिणा - 'यस्य वाक्यस्य तात्पर्यविषयीभूतः संसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्।' इति। उक्तञ्च, माधवाचार्येण-

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।

एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता।। इति।

एवमेतादृशप्रमाणवाक्येन बोध एव शाब्दप्रमा इच्युच्यते। तदुच्यते महर्षिणा जैमिनिना - 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत् प्रमाणं वादरायणस्यानपेक्षत्वात्' ( 1.1.5) इति। एवं मानान्तराप्राप्तावाधितार्थविषयकज्ञानजनकज्ञानविषयत्वे सति शब्दत्वं शब्दप्रमाणलक्षणम्। तत्र च तादृशवाक्यार्थश्च पदेभ्यः पदार्थेषु अभिहितेषु पश्चात् लक्षणया जायमानः पदार्थसंसर्ग एव तस्यापूर्वत्वात्। तत्र एकस्मिन् वाक्यार्थे चैकस्यैव पदार्थस्य मुख्यविशेष्यत्वम् इतरेषाञ्च साक्षात् परम्परया विशेषणत्वम्। तत्र च पदार्थानामन्वये आकांक्षादीनि सहकारिकारणानि भवन्ति। एवं

पदानामेकवाक्यतया वाक्यार्थधीजनकता। परन्तु, वाक्यैः प्रत्येकं स्वकीयनिराकांक्षवाक्यार्थे बोधिते अपि पुनः अपरवाक्यार्थेन सहाकांक्षा जायते चेत् तत्र वाक्यैकतया महावाक्यार्थबोधो भवति। स च न शाब्दबोधः अपि तु मानसबोध एव । तथाहि 'दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादिवाक्यतः स्वकीयार्थबोधे जाते अपि तस्य 'समिधो यजति' इति विधिवाक्येनाङ्गाङ्गिभावेन साकांक्षत्वात् पुनः एकवाक्यता जायते। सा च वाक्यैकवाक्यता । तया च एकस्य प्रकरणस्य वाक्यसमूहात्मकस्य महावाक्यार्थबोधकत्वं जायते। तदुच्यते कुमारिलभट्टपादैः तन्त्रवार्तिके –

स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया।

वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते।। इति।

तत्र महावाक्याख्ये प्रकरणे कस्य अर्थस्य प्राधान्यमिति निर्णयाय मीमांसाशास्त्रेषु तात्पर्यलिङ्गानि उपयुज्यन्ते। तादृशप्रकरणप्रतिपाद्यस्य कस्यचिद्विषयस्य प्राधान्ये यत् वेदवाक्यानां तात्पर्यं तस्य ज्ञापकानि लिङ्गानि एवात्र तात्पर्यलिङ्गशब्देनोच्यते। ननु किमिदं तात्पर्यं नाम येन च प्रकरणे विषयस्यैकस्य प्राधान्यमवगम्यते इति चेदुच्यते- तत्प्रमाजननानुकूलशक्तिमत्त्वमेव तात्पर्यस्वरूपमिति। शक्तिश्च योग्यताख्यैव ग्रहीतव्या। तथा च, वेदवाक्यजन्यस्य अज्ञातावाधितार्थविषयकज्ञानस्यैव शाब्दप्रमात्वेन तत्र च तद्विषयस्य अज्ञातत्वम् अबाधितत्वम् अर्थवत्त्वं च तात्पर्यतः

अवगम्यते। किञ्च, वेदवाक्यसमूहात्मके प्रकरणे च तादृशप्रमाविषयेषु उपस्थितेषु एकस्य विषयस्य च प्राधान्यप्रतिपादनद्वारा शाब्दबोधजननानुकूलशक्तिरेव वाक्यस्य तात्पर्यशब्देन गीयते। तस्य च तात्पर्यस्य ज्ञापकानि  षट् एव पदार्था भवन्ति। ते च उपक्रमोपसंहारौ , अभ्यासः, अर्थवादः, अपूर्वता, उपपत्तिः, फलञ्चेति। तथाह्युते प्राज्ञैः –

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।

अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिश्चये।। इति।

तत्र अपूर्वता , उपपत्तिः, फलञ्च प्रमाशरीरे एव प्रविष्टं विषयविशेषणतया दण्डचक्रन्यायेन प्रमामात्रं प्रति अपेक्षितम्, इतराणि च तृणारणिमणिन्यायेन इति विशेषः। अथ एतेषां स्वरूपमधस्तात् क्रमेण वर्ण्यते।

**उपक्रमोपसंहारौ-** तत्र उपक्रमोपसंहारौ नाम प्रकरणप्रतिपाद्यस्य अर्थस्य तत्तत्प्रकरणस्याद्यन्तयोः प्रतिपादनम्। तदुच्यते वेदान्तसारे सदानन्दयतीन्द्रेण - “प्रकरणप्रतिपाद्यस्य अर्थस्य तदाद्यन्तयोः उपपादनमुपक्रमोपसंहारौ।” इति। तथा एकत्र प्रकरणे एकस्य विषयस्य आदौ प्रतिपादनं कृत्वा तस्यैव यदि अन्ते पुनः प्रतिपादनं क्रियते तर्हि प्रकरणस्य तत्र विषये प्रधानतया तात्पर्यमस्ति इति ज्ञायते। तथाहि छान्दोग्योपनिषदः षष्ठे प्रपाठके  “सदेव सौम्य इदमग्र आसीत्,

एकमेवाद्वितीयम्। ” इत्युपक्रम्य अन्ते च “ ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो।” इति उपसंहरति। तथा चानेन प्रपाठकेन जगत्कारणतया सांख्यसिद्धप्रकृत्यादीनां प्रतिपादनाशङ्का तिरस्कृत्य आत्मतत्त्वमेव मुख्यतया प्रतिपाद्यते इति ज्ञायते।

**अभ्यासः-** तत्र प्रकरणप्रतिपाद्यस्य कस्यचित् विषयस्य पुनः पुनः प्रतिपादनमेव अभ्यासः। तदुच्यते वेदान्तसारे अभ्यासविषये- “प्रकरणप्रतिपाद्यस्य वस्तुनः तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः।” इति। तत्र एकस्य विषयस्य पुनः पुनः प्रतिपादने पुनरुक्तिदोषः एव भवति। तथापि कुत्रचित् प्रकरणे यदि अन्यैः विषयैः एकस्य विषयस्य पुनः पुनः प्रतिपादनं भवति तर्हि तत् तद्वस्तुनः प्राधान्यख्यापकमेव भवति, द्विर्बद्धं सुबद्धं भवतीति न्यायेन। एवमभ्यासः अपि कस्यचित् विषयस्य प्राधान्ये तात्पर्यग्राहकं भवति। तथाहि छान्दोग्ये तत्रैव षष्ठे प्रपाठके “तत्त्वमसि” इति वाक्यं नवधा पठितम्। अत एव एतेनाभ्यासेन प्रकरणस्यास्य प्रधानप्रतिपाद्यं परब्रह्म एवेति प्रतीयते।

**अर्थवादः –** अर्थवादः अपि अपरं तात्पर्यज्ञापकम्। एकत्र प्रकरणे तत्प्रकरणप्रतिपाद्येषु विषयेषु कस्यचित् यदि प्रशंसनं भवति तत् प्रशंसनमेव

तद्विषयस्य प्राधान्यं बोधयति। तादृशं प्रशंसा एव अर्थवादः। तथाहि श्रुतिषु आत्मतत्त्वविषये प्रशंसा क्रियते - “येनाश्रुतं श्रुतं भवति।” । एतेन तत्र तादृशप्रकरणे प्रशस्तिमदात्मतत्त्वस्यैव प्राधान्यं ज्ञायते।

**अपूर्वता –** तत्र प्रकरणप्रतिपाद्येषु विषयेषु यदि कस्यचित् अर्थस्य प्रमाणान्तरागम्यता भवति तर्हि तस्यैव अपूर्वता ज्ञायते। तदुच्यते वेदान्तसारे -“ प्रकरणप्रतिपाद्यस्य वस्तुनः प्रमाणान्तराविषयीकरणमपूर्वता।” इति। वैदिकवाक्येन प्रतिपादितस्यार्थस्य अपूर्वता अपेक्षिता एव , अन्यथा तद्विषयकज्ञानस्याप्रामाण्यं जायते, ज्ञातविषयकत्वेन प्रमायाश्च अज्ञातविषयकत्वात्। एवं “तन्त्वौपनिषदं पुरुषं पृच्छामि।” इत्यादिवाक्यद्वारा वेदान्तेषु ब्रह्मणः अपूर्वतया प्राधान्यं गम्यते।

**उपपत्तिः-** तत्र उपपत्तिरपि वैदिकवाक्यप्रतिपाद्यार्थस्य संशयनिराशकरणेन वैदिकवाक्यजन्यप्रमाजनकशक्तिज्ञापकं भवति। तत्र प्रकरणप्रतिपाद्यार्थस्य विषये यदि असम्भावनाबुद्धिर्जायते तथा युक्तिभिस्तत् निराक्रियते। तत्र तादृशी युक्तिरेवोपपत्तिशब्देनोच्यते। उपपत्तिश्च अर्थस्य अवाधितत्वं प्रतिपादयति। तदुच्यते उपपत्तिस्वरूपविषये वेदान्तसारे “ प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः उपपत्तिः।” इति। तथाहि तत्रैव छान्दोग्ये षष्ठे प्रपाठके “यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव

सत्यम्।” इति कथनेन विकारस्य वाचारम्भणमात्रत्वे युक्तिप्रदर्शनद्वारा अद्वितीयवस्तु साध्यते।

फलम्- फलम् नाम प्रयोजनम्। तथाहि प्रकरणप्रतिपाद्यस्यार्थेषु यदि कस्यचित् अर्थस्य प्रयोजनं ख्याप्यते तर्हि तत् भवति प्रधानम्। तत्रैव प्रकरणस्य तात्पर्यम्। फलस्वरूपविषये उच्यते वेदान्तसारे - “फलं तु प्रकरणप्रतिपाद्यस्य आत्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम्।” इति। तथाहि “आचार्यवान् पुरुषो वेद, तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये” “ ब्रह्मविद् ब्रह्मैव भवति” इत्यादिश्रुत्या ब्रह्मज्ञानस्य प्रयोजनमेव प्रतिपाद्यते। अतः तदेव ब्रह्म प्रधानप्रतिपाद्यं तत्रैव श्रुतेस्तात्पर्यमवधार्यते इति ज्ञेयम्।

एवं षड्विधैः तात्पर्यलिङ्गैः वेदार्थः सम्यक्तया विज्ञेय इति तात्पर्यलिङ्गावधारणमतीव प्रयोजनीयमिति शम्।